# संस्कृतवार्ताः

दिनाङ्क : 07/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अद्य सिलवासा-दमन-दीउ-दादरानगरहवेलीषु च सप्ताशीत्युत्तरपञ्चशताधिकद्विसहस्रकोटिरूप्यकाणां परियोजनानां उद्घाटनं शिलान्यासं च कृतवान्।
- अधुना प्रधानमन्त्री सूरत खाद्यसुरक्षासंतृप्ति-अभियानस्य आरम्भार्थं गुजरातस्य सूरानगरे अस्ति।
- केन्द्रीयगृहमन्त्री अमितशाहः तमिलसहितक्षेत्रीयभाषाणां प्रचारार्थं सर्वकारस्य प्रतिबद्धतां पुनः एकवारं सबलं स्मारितवान् ।
- जन-औषधिदिवसः अद्य सम्पूर्णे देशे अल्पमूल्यचिकित्सातन्त्रस्य तथा च जनानां मध्ये औषधानां जागरुकतासन्दर्भे परिपाल्यते।
- अमेरिकीय सर्वोच्चन्यायालयेन २६/११ मुम्बई-आतङ्क्याक्रमणस्य आरोपिणः तहवूर-राणा इत्यस्य भारतं प्रत्यर्पणं विरुध्य याचिका अस्वीकृता।
- बैडमिण्टन्-क्रीडायां भारतस्य आयुष-शेट्टी फ्रान्स्-देशस्य ऑर्लियन्स्-मास्टर्स्-सुपर-300-इत्यस्याः क्रीडायाः पुरुष-एकल-प्रागुपान्त्यचक्रीय-क्रीडायां प्रविष्टः ।

---

प्रधानमन्त्री मोदी गुजरात यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य सिलवासा-दमन-दीउ-दादरानगरहवेलीषु च सप्ताशीत्युत्तरपञ्चशताधिकद्विसहस्रकोटिरूप्यकाणां परियोजनानां उद्घाटनं शिलान्यासं च कृतवान्। श्रीमोदी सिलवासानगरे सार्धचतुश्शतशय्यायुक्तस्य नमो-चिकित्सालयस्य

अनुसन्धानकेन्द्रस्य च उद्घाटनं कृतवान् । एतेन सममेव सः केन्द्रशासिते प्रदेशे सार्धसप्तदशशतकोटिरूप्यकाणां पञ्चविंशतिः परियोजनानां उद्घाटनं कृतवान् । अस्मिन् अवसरे श्री मोदिना त्रयोदशपरियोजनानां शिलान्यासः अपि कृतः, यासु दमननगरे शतत्रयशय्यायुक्तस्य मारवाड़-चिकित्सालयस्य चतुर्खण्डानां निर्माणम्, खानवेल-नगरस्य उपजनपद-चिकित्सालयस्य निर्माणम्, दमन-नगरे राष्ट्रियराजमार्गस्य अष्टचत्वारिंशदधिकाष्टशत- बी इत्यस्य विस्तारः, दमन-दिव इत्यत्र च द्वादश नवीनविद्यालयानाम् निर्माणम्, मार्गविकासः च अन्तर्भवन्ति। प्रधानमन्त्री सूरत खाद्यसुरक्षासंतृप्ति-अभियानस्य आरम्भार्थं गुजरातस्य सूरानगरे अस्ति। प्रधानमन्त्री गरीब कल्याण अन्न- योजनाया: अन्तर्गतं सूरते प्रायः द्विलक्षं लाभार्थिनः अस्य अभियानस्य लाभं प्राप्स्यन्ति। श्वः अन्ताराष्ट्रियमहिलादिवसस्य अवसरे श्रीमोदी नवसारीनगरे 'लखपतिदीदीसम्मेलने' भागं ग्रहीष्यति। प्रधानमन्त्री पञ्चविंशतिसहस्रतो अपि अधिकेभ्यः स्वसहायतासमूहेभ्यः सार्धद्विलक्षमहिलाभ्यः सार्धचतुर्कोटितोप्यधिक रूप्यकाणां सहायतां वितरिष्यति।

---------------------------------------

अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाहः तमिलसहितक्षेत्रीयभाषाणां प्रचारार्थं सर्वकारस्य प्रतिबद्धतां पुनः एकवारं सबलं स्मारितवान् । ठाकोटकोलाम्-नगरे सीआईएसएफ-संस्थायाः षट्पञ्चाशत्तमे स्थापनादिवसावसरे भाषमाणः श्री शाहः तमिलनाडु-नगरस्य समृद्धसांस्कृतिकन्यासस्य संरक्षणस्य महत्त्वं बोधयन्, राज्यस्य भाषा-सांस्कृतिकन्यासं च सम्मानयितुं प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रयत्नान् सप्रकाशं वर्णितवान्। तेन केन्द्रसर्वकारस्य क्षेत्रीयभाषाणां यथा तमिलप्रभृतीनां केन्द्रीयशस्त्रारक्षिबलानां परीक्षासु समायोजनस्य पदक्रमः अपि सविशेषं चर्चितः।

सः अवदत् यत् तमिलभाषा, संस्कृतिः, परम्पराः च भारतीयसंस्कृतेः बहुमूल्यरत्नानि सन्ति। तेन तमिलनाडोः मुख्यमन्त्री एम् के स्टालिन् इति निवेदितः यत् तमिलनाडुसर्वकारेण

तमिलभाषायां चिकित्सा-अभियान्त्रिकी-पाठ्यक्रमाः यथाशीघ्रं प्रारम्भाः कर्त्तव्याः। एतेन न केवलं तमिलजनानां मूलं सुदृढं भविष्यति अपितु विविधक्षेत्रेषु समानावकाशाः अपि प्राप्स्यन्ते। गृहमन्त्री पुनर्बलं प्रदाय एतद्विषयं स्मारितवान् यत् प्रधानमन्त्रिणः लक्ष्यमस्ति सप्तविंशत्यधिकद्विसहस्रतमं वर्षं यावत् भारतं विश्वस्य तृतीय-बृहत्तम-अर्थव्यवस्थारूपेण स्थिरं भवेत्।

श्रीशाहः एतदपि विषयं प्रकाशितवान् यत् सीआइएस्‌एफ़् राष्ट्रस्य मुख्यसंयन्त्राणां रक्षणे महत्त्वपूर्णं योगदानं यच्छति।

---------------------------------------

प्रधानमन्त्री जन-औषधि-दिवसः

जन-औषधिदिवसः अद्य सम्पूर्णे देशे अल्पमूल्यचिकित्सातन्त्रस्य तथा च जनानां मध्ये औषधानां जागरुकतासन्दर्भे परिपाल्यते। प्रधानमन्त्री भारतीय-जन-औषधिपरियोजनायाः उद्देश्यं सम्पूर्णे भारते उत्तमगुणवत्तायुक्त-औषधीनाम् अल्पमूल्ययुक्तानां च सामान्यजनं प्रति प्रापणम् अस्ति। रसायनोर्वरकमन्त्रालयेन अस्य उद्देश्यस्य सम्पूर्णे देशे प्रचाराय साप्ताहिकाः कार्यक्रमाः गतिविधयः च विचारिताः सन्ति।

स्वसन्देशे प्रधानमन्त्री श्रीनरेन्द्रमोदी उक्तवान् यत् जन-औषधि इति उपक्रमः सर्वकारस्य सामान्यजनं यावत् उत्तम-औषधानाम् अल्पमूल्येन प्रापणम् इति प्रतिबद्धतां प्रदर्शयति। एकस्मिन् सामाजिकतन्त्रसन्देशमाध्यमेन श्रीमोदी प्रकाशितवान् यत् कथं देशस्य प्रत्येकं कोणं यावत् औषधानि प्राप्यन्ते।

केन्द्रीयस्वास्थ्यमन्त्री जगतप्रकाशनड्डा स्वसन्देशे उक्तवान् यत् देशे पञ्चदशसहस्राधिकानि जन-औषधिकेन्द्राणि प्रतिदिनं दशलक्षतो अपि अधिकान् जनान् सेवन्ते। एतेषु केन्द्रेषु उपलभ्यमानानि औषधानि पञ्चाशत्तः नवतिप्रतिशतं यावत् अल्पमूल्येषु दीयन्ते।

केन्द्रीयस्वास्थ्यराज्यमन्त्री अनुप्रिया पटेलः अवदत् यत् प्रधानमन्त्री भारतीयजनौषधिपरियोजना स्वास्थ्यक्षेत्रे वरदानभूता एव सिद्धा जाता अस्ति।

---------------------------------------

प्रधानमन्त्री-पुरस्कारः

प्रधानमन्त्री नरेन्द्रमोदी अद्य कोविड-नवदश महामारीकाले तस्य नेतृत्वाय बहुमूल्यसहायतायै च बारबाडोस्-देशेन फ्रीडम-ऑफ-बारबाडोस पुरस्कारः यः प्रदत्तः आसीत् तदर्थं तत्रत्य सर्वकारस्य जनानां च आभारं प्रकटितवान्। एकस्मिन् सामाजिकान्तर्जालीय सन्देशे श्रीमोदिना उक्तं यत् सम्पूर्णभारतीयजनेभ्यः भारत-बारबाडोस-देशयोः सुदृढ-सम्बन्धाय च अयं पुरस्कारः समर्पितः।

----------------------------------------

२६/११ याचिका अस्वीकारः -

अमेरिकीय सर्वोच्चन्यायालयेन २६/११ मुम्बई-आतङ्क्याक्रमणस्य आरोपिणः तहवूर-राणा इत्यस्य भारतं प्रत्यर्पणस्य विरुद्धं याचिका अस्वीकृता। पाकिस्तानमूलस्य कनाडादेशीयः तहवूरः "अमेरिकादेशस्य सर्वोच्चन्यायालये स्थातुं आपत्कालीन-स्थगनावेदनं प्रदत्तवान् आसीत् । सः स्वस्य याचिकायां उक्तवान् यत् भारते तस्य प्रत्यार्पणेन अमेरिका देशस्य विधेः, संयुक्तराष्ट्रामेरिका देशस्य यातना-विरुद्ध-सन्धेः च उल्लङ्घनं भविष्यति। याचिकायां तेन चिकित्सा-अभिलेखाः अपि उद्धृताः सन्ति ।अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह संयुक्तवार्ताहरसम्मेलने प्रत्यर्पणप्रक्रियायाः अनुमोदनस्य घोषणां कृतवान् एतद् अनन्तरं राणा इत्यनेन याचना कृता आसीत् ।अष्टोत्तर द्विसहस्र तमे वर्षे पाकिस्तानदेशस्य लश्कर-ए-तैबा आतङ्कवादिभिः कृतेषु आतङ्कवादी आक्रमणेषु संलग्नः इति कारणेन भारते राणा वांछितः अस्ति। यस्मिन् चतुः सप्तत्यधिकैक शतं यावत् जनाः मृत्युमुपागताः।

----------------------------------------

बैडमिण्टन्-क्रीडा

बैडमिण्टन्-क्रीडायां भारतस्य आयुष-शेट्टी फ्रान्स्-देशस्य ऑर्लियन्स्-मास्टर्स्-सुपर-300-इत्यस्याः क्रीडायाः पुरुष-एकल-प्रागुपान्त्यचक्रीय-क्रीडायां प्रविष्टः। अद्य सायंकाले प्रागुपान्त्यचक्रीय-क्रीडायां सः डेन्मार्क-देशस्य रास्मस् गेम्के इत्यमुं सम्मुखी करिष्यति।

।। इति वार्ता:।।